नैव क्लिष्टा न च कठिणा

रागः – यमन् कल्याणी

सुरस सुबोधा, विश्व मनोज्ञा
ललिता हृद्या, रमणीया ।
अमृत वाणि, संस्कृत भाषा
नैव क्लिष्टा न च कठिणा ॥

कवि कोकिला वाल्मीकि विरचिता
रामायण रमणीय कथा ।
अतीव सरला मधुर मन्जुला
नैव क्लिष्टा न च कठिणा ॥

व्यास विरचिता गणेश लिखिता
महाभारते पुण्य कथा ।
कौरव पाण्डव संगर मथिता
नैव क्लिष्टा न च कठिणा ॥

कुरुक्षेत्र समराङ्गणगीता
विश्ववन्दिता भगवद्गीता ।
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिणा ॥

कविकुलगुरुनवरसोन्मेषजा
ऋतु-रघु-कुमारकविता ।
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिणा ॥

श्री वसन्त गाङ्गीलः ·

naiva kliṣṭā na ca kaṭhiṇā

rāgaḥ – yaman kalyāṇī

surasa subodhā, vishva manojnā
lalitā hridyā, ramaṇīyā |
amṛta vāṇi, saṃskṛta bhāṣā
naiva kliṣṭā na ca kaṭhiṇā ||

kavi kokilā vālmīki viracitā
rāmāyaṇa ramaṇīya kathā |
atīva saralā madhura manjulā
naiva kliṣṭā na ca kaṭhiṇā ||

vyāsa viracitā gaṇesha likhitā
mahābhārate puṇya kathā |
kaurava pāṇḍava sangara mathitā
naiva kliṣṭā na ca kaṭhiṇā ||

kurukshetra samarāṅgaṇagītā
viśvavanditā bhagavadgītā |
amṛtamadhurā karmadīpikā
naiva kliṣṭā na ca kaṭhiṇā ||

kavikulagurunavarasonmeṣajā
ṛtu-raghu-kumārakavitā |
vikrama-ṡākuntala-mālavikā
naiva kliṣṭā na ca kaṭhiṇā ||

śrī vasanta gāḍgīlaḥ .

पठत संस्कृतम्

रागः – रेवति

पठत संस्कृतम्, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ पठत॥

ज्ञानवैभवं वेदवाङ्मयं
लसति भवभयापहारि यत्र मुनिभिरार्जितम् ।
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाण-मुख्यकविभिः ॥ पठत॥

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम् ।
नैव यद्विना जना विजानते
भारतीयसंस्कृतिं सनातनाभिधां वराम् ॥ पठत॥

जयतु संस्कृतम्, संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम् ।
जयतु संस्कृतम्, जयतु मनुकुलम्
जयतु जयतु संस्कृतम्, जयतु जयतु मनुकुलम् ॥ पठत॥

श्री मञ्जुनाथशर्मा ·

paṭhata saṃskṛtam

rāgaḥ – revati

paṭhata saṃskṛtam, vadata saṃskṛtam
lasatu saṃskṛtaṃ ciraṃ gṛhe gṛhe ca punarapi ॥ paṭhata॥

jnānavaibhavaṃ vedavāṅmayaṃ
lasati bhavabhayāpahāri yatra munibhirārjitam ।
kīrtirārjitā yasya praṇayanāt
vyāsa-bhāsa-kālidāsa-bāṇa-mukhyakavibhiḥ ॥ paṭhata॥

sthānamūrjitaṃ yasya manvate
vāgvicintakā hi vākśu yasya vīkśya madhuratām ।
naiva yadvinā janā vijānate
bhāratīyasaṃskṛtiṃ sanātanābhidhāṃ varām ॥ paṭhata॥

jayatu saṃskṛtam, saṃskṛtistathā
saṃskṛtasya saṃskṛteśca praṇayanācca manukulam ।
jayatu saṃskṛtam, jayatu manukulam
jayatu jayatu saṃskṛtam, jayatu jayatu manukulam ॥ paṭhata॥

śrī mañjunāthaśrmā .